## त्रिपुराराज्ये अनौपचारिक-संस्कृत-शिक्षण-केन्द्रस्य उद्घाटनोत्सवः

त्रिपुराराज्ये ऊनकोटी-मण्डलस्य फटिकराय-जनपदस्थे आम्वेदकर-महाविद्यालये राष्ट्रिय-संस्कृत-संस्थानस्य सहयोगेन अगस्ट-मासस्य चतुर्दशतमदिनाङ्के अनौपचारिक-संस्कृत-शिक्षण-केन्द्रस्य उद्घाटनकार्यक्रमः प्राचलत्। कार्यक्रमे मुख्यातिथिरूपेण त्रिपुरा-विधानसभायाः माननीयः सदस्यः संस्कृतज्ञः श्री सुधांशु-दाशः, अध्यक्षरूपेण महाविद्यालयस्य मुख्यः डा. सुव्रत-शर्मा-महोदयः, मुख्यवक्तृरूपेण राष्ट्रिय-संस्कृत-संस्थानस्य एकलव्य-परिसरस्य शिक्षकः डा. महेश-कुमार-पाणिग्राही-महोदयः, विशेषअतिथिरूपेण आसामराज्यस्य करिमगञ्ज-जनपदादागतः श्री अर्जुन-देव-महाशयः, महाविद्यालयस्य संस्कृतविभागाध्यक्षः डा.अनिल-कुमार-आचार्यः, अनौपचारिक-संस्कृत-शिक्षण-केन्द्रस्य शिक्षिका श्रीमती सुशान्ति-देवनाथः च उपस्थिताः आसन्। अस्मिन् कार्यक्रमे माहाविद्यालयस्य बालिकाभिः स्वागतसङ्गीतः उपस्थापितः। कार्यक्रमे महाविद्यालयस्य च्छात्राः, शिक्षकाः, फटिकराय-जनपदस्य संस्कृपठनेच्छुकाः बालाः वृद्धाश्च भागम् अवहन्, अनौपचारिकरूपेण संस्कृतस्य शिक्षणार्थं नाम पञ्जीकृतवन्तः च। राष्ट्रियगानेन कार्यक्रमोऽयं समाप्तः अभवत्।




